स्वर्णजयन्तीवर्षम् 2019-20

# आशुबोधव्याकरणम्

संकलितम्
श्री तारानाथ-तर्कवाचस्पति-भट्टाचार्येण
पू० पू० अध्यक्षेण
कलकत्तासंस्कृतविद्यामन्दिरम्

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

# आशुबोधव्याकरणम्

संकलितम्
**श्री तारानाथ-तर्कवाचस्पति-भट्टाचार्येण**
भू० पू० अध्यक्षेण
कलकत्तासंस्कृतविद्यामन्दिरम्

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

# आशुबोधस्य सूचीपत्रम्।


| | | | |
|---|---|---|---|
| संज्ञाप्रकरणम् | १ | लुट्प्रकरणम् | १५२ |
| परिभाषाप्रकरणम् | ११ | आशीर्लिङ्प्रकरणम् | १५३ |
| अच् सन्धिप्रकरणम् | १८ | लृट्प्रकरणम् | १५५ |
| हलसन्धिप्रकरणम् | २४ | लृङ्प्रकरणम् | १५६ |
| विसर्गसन्धिप्रकरणम् | ३० | तिङन्तणत्वप्रकरणम् | १५७ |
| शब्दसंज्ञाप्रकरणम् | ३४ | तिङन्तषत्वप्रकरणम् | १५९ |
| परिभाषाप्रकरणम् | ४० | णिजन्तप्रकरणम् | १६२ |
| अजन्तपुंलिङ्गप्रकरणम् | ४२ | सनन्तप्रकरणम् | १६९ |
| अजन्तस्त्रीलिङ्गप्रकरणम् | ५७ | यङन्तप्रकरणम् | १७४ |
| अजन्तक्लीवलिङ्गप्रकरणम् | ६२ | यङ्लुगन्तप्रकरणम् | १७८ |
| हलन्तपुंलिङ्गप्रकरणम् | ६७ | नामधातुप्रकरणम् | १८० |
| हलन्तस्त्रीलिङ्गप्रकरणम् | ८० | आत्मनेपदप्रकरणम् | १८७ |
| हलन्तक्लीवलिङ्गप्रकरणम् | ८३ | परस्मैपदप्रकरणम् | १९३ |
| अव्यय प्रकरणम् | ८५ | भावककर्मप्रकरणम् | १९४ |
| तिङन्त संज्ञाप्रकरणम् | ८७ | कर्मकर्तृप्रकरणम् | १९८ |
| भ्वादिप्रकरणम् | १०२ | लकारार्थप्रकरणम् | २०० |
| अदादिप्रकरणम् | १०८ | कृत्यकृदन्तप्रकरणम् | २०७ |
| जुहोत्यादिप्रकरणम् | ११७ | कृदन्तणत्वप्रकरणम् | २१४ |
| दिवादिप्रकरणम् | १२१ | कर्तृकृदन्तप्रकरणम् | २१५ |
| स्वादिप्रकरणम् | १२२ | निष्ठाकृदन्तप्रकरणम् | २३७ |
| तुदादिप्रकरणम् | १२३ | कर्मादिकृदन्तप्रकरणम् | २४४ |
| रुधादिप्रकरणम् | १२५ | स्त्रीत्वप्रकरणम् | २६५ |
| तनादिप्रकरणम् | १२६ | कारकप्रकरणम् | २७५ |
| क्र्यादिप्रकरणम् | १२७ | समासप्रकरणम् | ३०० |
| चुरादिप्रकरणम् | १२८ | अव्ययीभावप्रकरणम् | ३०१ |
| स्वार्थिकप्रत्ययान्तधातुप्रकरणम् | १२९ | तत्पुरुषप्रकरणम् | ३०६ |
| लुङ्तिङन्तप्रकरणम् | १३१ | तत्पुरुषीयसमासान्तप्रकरणम् | ३११ |
| लिट्प्रकरणम् | १४५ | बहुव्रीहिप्रकरणम् | ३१७ |

अदृश्यार्था: चादय: निपातसंज्ञा: स्यु: । च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, चेत्, कच्चित्, हन्त, माङ्, नञ्, यावत्, तावत्, वषट्, वौषट्, स्वाहा, स्वधा, तथाहि, खलु, अथ, सुष्ठु, स्म ( उपसर्गप्रतिरूपा: प्रादय: ) अहम्, अस्ति, अ, उ, यथा, हे, है, अङ्ग, अये, विषु, यत्, तत्, आहोस्वित्, व, चट्, चाटु, हुम्, इव, जातु, अद इत्यादय: चादय: । एतेषाम् अर्थभेदास्तु मत्कृतायां सरलाख्यायां सिद्धान्तकौमुदीव्याख्यायां पूर्वार्द्धे २०१ पृष्ठे द्रष्टव्या: । निपातोपसर्गयो: नामत्वम् अपि इच्छन्ति केचित् । तेन तत: सुबादय: स्यु: तेषां च लुक् इति भेद: ।

**नामधातूपसर्गनिपाता: प्रकृति: ॥ ३३ ॥**

नामादय: प्रकृतिसंज्ञा: स्यु: ।

**प्रकृते: परं विधीयमान: सार्थक: शब्द: प्रत्ययो निरर्थकस्तु विकरण: ॥ ३४ ॥**

उक्तप्रकृतिभ्य: उत्तरं विधीयमान: सार्थक: सुबादि: शब्द: प्रत्ययसंज्ञ: स्यात् । निरर्थक: तु तथाभूत: शबादिविकरणसंज्ञ: स्यात् । बहुच्प्रत्यय: तु प्रकृते: परम् एव विधीयते । तस्य प्रयोगकाले तु प्राङ्निपात: । तत्र नामप्रकृतिका: सुप्तद्धितादय: । धातुप्रकृतिका: तिङ्कृदादय: । उभयप्रकृतिका: क्यजादय: । तद्धिता: पुन: निपातोपसर्गप्रकृतिका: अपि । तेन नतरां सुतराम् इत्यादि ।

**संख्यावाचक: प्रत्ययो विभक्ति: ॥ ३५ ॥**